भारतमञ्जरी/शल्यपर्व

< भारतमञ्जरी

शल्यपर्व

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।

देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ९.१ ॥

एवं जम्भ इवेन्द्रेण हते कर्णे किरीटिना ।

युद्धं न्यवेदयद्राज्ञे पुनरभ्येत्य संजयः ॥ ९.२ ॥

शेखरे सर्ववीराणामर्थिनां कल्पपादपे ।

हते वैकर्तने राजन्सर्वाशारजनीकृति ॥ ९.३ ॥

तदात्मना गते क्वापि निजजीव इवाकुलः ।

दुर्योधनो निरुच्छ्वासो मेने शून्या दिशो दश ॥ ९.४ ॥

चचार रथिनां मध्ये पाण्डवान्योद्धुमुद्यतः ।

परेणैव शरीरेण परलोकगतो नरः ॥ ९.५ ॥

ततो द्रौणिगिरा कृत्वा शल्यं सेनापतिं नृपः ।

रणं वितर(?)राज्यार्थे विवेश त्रिदशालयम् ॥ ९.६ ॥

रथानामयुतं साग्रं तावदेव च दन्तिनाम् ।

लक्ष्यद्वयं द्वयानां च तिस्रः कोट्यः पदातिनाम् ॥ ९.७ ॥

सैन्यशेषमभूदेतत्कुरुराजस्य संगरे ।

अतोर्ऽधं पाण्डवानां च हतशेषमभूद्बलम् ॥ ९.८ ॥

अस्मिन्नायोधने घोरे राज्ञां संहारमण्डले ।

मस्तिष्ककर्दमलुठत्पत्तिस्यन्दनकुञ्जरे ॥ ९.९ ॥

आकीर्णवक्त्रकमले रङ्गोद्भङ्गरथाङ्गके ।

विस्रस्ताराजंसौघे खङ्गखण्डोत्पलाकुले ॥ ९.१० ॥

केशशेवालजम्बालशेषकीलालपिच्छिले ।

अकालकालकरिणा सरसीव विलोडिते ॥ ९.११ ॥

स्रस्तवराश्वकर्णाङ्कि भग्नबाणासनावृते ।

कदलीशकलालोले वने वज्रैरिवाहते ॥ ९.१२ ॥

उत्पलावयवापूर्णव्यक्तशक्त्यासवोदिते ।

उद्यान इव कालस्य कपालचषकाकुले ॥ ९.१३ ॥

पुनः प्रवृत्ते समरे शल्यहार्दिक्यसौवलाः ।

विविशुः पाण्डवचमूं कृपद्रौणिसुयोधनाः ॥ ९.१४ ॥

पार्थपार्षतशैनेयद्रौपदेयशिखण्डिनः ।

जघ्नुस्त्रिगर्तगान्धारकपिनाथवरूथिनीः ॥ ९.१५ ॥

अमर्यादे रणे तस्मिन्क्षीबा इव महारथाः ।

क्रुद्धा युयुधिरे घोरं हतबन्धुसुहृद्गणाः ॥ ९.१६ ॥

सत्यसेनं सुषेणं च चित्रसेनं च कर्णजम् ।

जघान नकुलो वीरान्कर्णतुल्यपराक्रमान् ॥ ९.१७ ॥

ततः शल्येन बलिना गजेनेव सरोजिनी ।

मृद्यमाना सनिर्घोषा चकम्पे पाण्डुवाहिनी ॥ ९.१८ ॥

शल्येन रिपुशल्येना वध्यमानां वरूथिनीम् ।

दृष्ट्वा भीमो गदापाणिर्भीमकोपस्तमाद्रवत् ॥ ९.१९ ॥

स हत्वा गदया तस्य रथं रथशतच्छिदः ।

मुमूर्षोर्दण्डमुद्यम्य तस्थौ काल इवाग्रतः ॥ ९.२० ॥

आदाय मद्रराजोऽपि गदां चामीकराङ्गदाम् ।

भीमं भीमबलः कोपाद्दर्पोद्धतमयोधयत् ॥ ९.२१ ॥

मण्डलानि चरन्तौ तावभिपत्य परस्परम् ।

घातजातस्फुलिङ्गाभ्यां गदाभ्यामभिजघ्नतुः ॥ ९.२२ ॥

तयोर्मूर्च्छितयोः क्षिप्रं मोहात्पतितयोर्भुवि ।

सानुगास्तूर्णमाजग्मुः संरब्धाः कुरुपाण्डवाः ॥ ९.२३ ॥

संज्ञामवाप्य सहसा यथावत्स्थितयोस्तयोः ।

दुर्योधनमुखा वीराः पार्थमुख्यानयोधयन् ॥ ९.२४ ॥

ब्रह्मलोकाभिकामेषु युध्यमानेषु राजसु ।

सुयोधनश्चेकितानमवधीद्भूभुजां वरम् ॥ ९.२५ ॥

मद्रराजस्ततः क्रुद्धः पाण्डूपुत्रान्सहानुगान् ।

अवारयद्बलादेकः पूज्यमानो नभश्चरैः ॥ ९.२६ ॥

शस्त्रवृष्टिं तदुत्सृष्टां छित्त्वा बाणैरसंभ्रमः ।

मुहुर्ताद्विदधे शल्यस्तानदृश्यान्पतत्रिभिः ॥ ९.२७ ॥

छादिते शरजालेन सैन्ये मद्रमहीभुजा ।

क्रुद्धोऽवधीत्सहस्रे द्वे रथानां धर्मनन्दनः ॥ ९.२८ ॥

दृष्ट्वानुगान्हतान्राज्ञा शल्यो युधि युधिष्ठिरम् ।

शिलीमुखशतैः पूर्णमथाशोकमिवाकरोत् ॥ ९.२९ ॥

पीडिते धर्मतनये नकुलः कोपकम्पितः ।

भीमसात्यकिमुख्याश्च शरैः शल्यमवाकिरन् ॥ ९.३० ॥

ततः शरान्धकारेण स्थगयन्भुवनोदरम् ।

उन्ममाथः घनध्वानः शल्यः पार्थवरूथिनीम् ॥ ९.३१ ॥

आकुलः समरे तस्मिञ्जिष्णुर्द्रैणिमयोधयत् ।

दुर्योधनं भीमसेनो नकुलः सुबलात्मजम् ॥ ९.३२ ॥

क्षपिताशेषनृपतेः शल्यस्याथ युधिष्ठिरः ।

छित्त्वायुधानि सर्वाणि तिलशो विदधे रथम् ॥ ९.३३ ॥

अपरं रथमास्थाय मद्रराजः क्रुधा ज्वलन् ।

चकार धर्मतनयं कृत्तचापरथध्वजम् ॥ ९.३४ ॥

भीमसेनोऽथ विरथं दृष्ट्वा राजानमाकुलः ।

चकर्त मद्रराजस्य रथं सर्वायुधैः सह ॥ ९.३५ ॥

खड्गहस्तस्ततः शल्यो निघ्नन्स्यन्दनकुञ्जरान् ।

चचारालक्षिततनुर्मार्गैर्गरुडविक्रमः ॥ ९.३६ ॥

अथ ज्वालायमानेन शोणपट्टेन गुण्ठिताम् ।

भ्राजिष्णुरत्नखचितां मृत्योर्दन्तावलीमिव ॥ ९.३७ ॥

एतदन्तं कुरुबलं युद्धमेवंविधं कुतः ।

इतीव घण्टापटलैः क्रोशन्तीमशनिस्वनाम् ॥ ९.३८ ॥

युधिष्ठिरः सहस्रघ्निं दीप्तां षण्मुखविक्रमः ।

प्राहिणोन्मद्रराजाय शक्तिं शक्तिमतां वरः ॥ ९.३९ ॥

स तया भिन्नहृदयः पपात क्ष्माभृतां वरः ।

श्रोत्रनासास्यविवरस्रवद्रुधिरनिर्झरः ॥ ९.४० ॥

▪ ▪ ▪ ▪ ▪ शल्यवधः ॥ १ ॥ *****

शल्ये हते कौरवाणामाशा शेषावलम्बने ।

रथिनो दुद्रुवुः सर्वे भग्नमानमनोरथाः ॥ ९.४१ ॥

ततः शल्यानुजः क्रुद्धो विचित्रकवचाभिधः ।

अभ्यायायौ धर्मराजं दारयन्तमनीकिनीम् ॥ ९.४२ ॥

पृषत्कवर्षिणस्तस्य चित्ररत्नोज्ज्वलं शिरः ।

रोहणाद्रेरिवोत्तुङ्गं शृङ्गं चिच्छेद धर्मजः ॥ ९.४३ ॥

तस्मिन्हते भज्यमानां नाथहीनां पताकिनीम् ।

परावृत्य कृपद्रौणिहार्दिक्यास्तूर्णमाययुः ॥ ९.४४ ॥

नदद्भिश्चेदिपाञ्चालैर्लब्धलक्ष्यैर्महारथाः ।

ते मुहूर्तं युयुधिरे प्रयाता बहुतामिव ॥ ९.४५ ॥

ततः स्वामिवधामर्षाद्युधिष्ठिरमभिद्रुतान् ।

हत्वा शेषानहो मद्रानमद्रां पृथिवीं व्यधात् ॥ ९.४६ ॥

अथ भीमो गदापाणिर्निपुणः क्षयकर्मसु ।

निष्पिष्य म्लेच्छान्सर्वांश्च रणं शून्यमिवाकरोत् ॥ ९.४७ ॥

ततः सात्यकिना वीरे सत्यराजे निपातिते ।

स्वयं दुर्योधनोऽभ्येत्य पाण्डुपुत्रानयोधयत् ॥ ९.४८ ॥

न रथो न गजो नाश्वो न योधः पाण्डवेष्वभूत् ।

हैमनामाङ्कितैर्व्याप्तो यो न दुर्योधनेषुभिः ॥ ९.४९ ॥

चकम्पे कुञ्जरकुलं तस्य नाराचवर्षिणः ।

मणिकाञ्चनझाङ्कारतारमौर्वीरवैर्मुहुः ॥ ९.५० ॥

दुर्योधने युध्यमाने लब्धलक्ष्यैररातिभिः ।

आययुर्द्रौणिहार्दिक्यसुशर्मकृपसौबलाः ॥ ९.५१ ॥

घोरे रणव्यतिकरे तेषां निबिडपातिनाम् ।

निरालोकोऽभवल्लोको रजसा संवृते रवौ ॥ ९.५२ ॥

कुञ्जरेन्द्रतटाघातक्षमे रजसि दुःसहे ।

विभागो नाभवत्कश्चित्कल्पापाय इवागते ॥ ९.५३ ॥

क्व द्रौणिः क्व च गान्धारः क्व च राजा सुयोधनः ।

इत्यभूद्विपुलः शब्दः पाण्डुसेनासु सर्वतः ॥ ९.५४ ॥

तस्मिन्मुहूर्ते प्रलयावर्तसंक्रान्तगोचरे ।

जघान मारुतसुतः शेषान्दुर्योधनानुजान् ॥ ९.५५ ॥

महाबाहुं भूरिबलं जैत्रं दुर्दर्शनं शलम् ।

सुनादं च स हत्वा तानुन्ननाद क्षयोचितान् ॥ ९.५६ ॥

ततो मामग्रहीद्वीरः सात्यकिर्विनरले रणे ।

संजयोऽयं मया लब्धो निगद्येति ससंभ्रमम् ॥ ९.५७ ॥

अथार्जुनः सुशर्माणं सपुत्रं सपदानुगम् ।

हत्वा संशप्तकानीकं निःशेषं विशिखैर्व्यधात् ॥ ९.५८ ॥

द्यूते रणाभिधे तस्मिन्सायकाक्षान्क्षिपन्मुहुः ।

सहदेवोर्ऽधचन्द्रेण जहार शकुनेः शिरः ॥ ९.५९ ॥

- - - - - शकुनिवधः ॥ २ ॥ *****

उलूकं तत्सुतं हत्वा गान्धाराणामनीकिनीम् ।

जघान माद्रीतनयो वनवासदशां स्मरन् ॥ ९.६० ॥

अथ निःशेषिते सैन्ये श्रान्तो निहतवाहनः ।

अपसृत्य रणात्प्रायात्पद्भ्यां राजा सुयोधनः ॥ ९.६१ ॥

कृतवर्मकृपद्रौणिशेषे तस्मिन्महारणे ।

क्षणादशेषतां याते भूतवेतालमण्डले ॥ ९.६२ ॥

धृष्टद्युम्नस्य वचसा मां निहन्तुं समुद्यते ।

शैनेये भगवान्व्यासो ररक्ष करुणानिधिः ॥ ९.६३ ॥

ततो दिनान्ते शोकार्तः प्रस्थितोऽहं सुयोधनम् ।

अपश्यं वज्रहृदयं प्रयान्तं चक्रवर्तिनम् ॥ ९.६४ ॥

स पादचारी मां दृष्ट्वा लज्जाकुटिलकन्धरः ।

ऊचे संजयराजानं ब्रूयास्त्वं जनकं मम ॥ ९.६५ ॥

तेन कर्णेन सुहृदा तैश्च वीरैर्विना कृतः ।

ह्रदं प्रविष्टः पुत्रस्ते हीनो दुःशासनादिभिः ॥ ९.६६ ॥

मामित्युक्त्वा स संस्तम्भ्य सलिलं दैत्यमायया ।

ह्रदं विवेश विपुलं प्रौढशोकानलाकुलः ॥ ९.६७ ॥

तं स्तम्भितोरुसलिले सरसि प्रविष्टं ज्ञात्वा गिरा मम गुरोस्तनयः कृपश्च ।

भोजश्च भूपतिशिखामणिलीढपादं लक्ष्मीविलाससदनं शुशुचुस्तमेत्य ॥ ९.६८ ॥

अक्षौहिणीपरिवृतोऽथ विसृज्य गेहं रात्रौ युयुत्सुमखिलैः सह राजदारैः ।

धर्मात्मजस्तमृणशेषमिव प्रदध्यौ दुर्योधनं सह धनंजयभीममुख्यैः ॥ ९.६९ ॥

यत्पादपद्मनखचन्द्रमरीचिमाला माला इव क्षितिभृतां बभुरुत्तमाङ्गे ।

सोऽप्येक एव कुरुराजसुतः पदातिर्यातो धिगास्थिरविलासविकासि दैवम् ॥ ९.७० ॥

यस्या वशाद्बत नतोन्नतभाञ्जि भावचक्राणि हन्त विशरारुदशां विशन्ति ।

संक्रन्दनानि यतिविभ्रममुद्रितानि तस्यै नमोऽस्तु सततं भवितव्यतायै ॥ ९.७१ ॥

इति क्षेमेन्द्रविरचितायां भारतमञ्जर्यां शल्यपर्व

"https://sa.wikisource.org/w/index.php?title=भारतमञ्जरी/शल्यपर्व&oldid=101965" इत्यस्माद् पुनः प्राप्तिः

- ३१ जनवरी २०१७ (तमे) दिनाङ्के अन्तिमसम्पादनं ०५:४६ समये अभवत्
- पाठः क्रियेटिव कॉमन्स ऐट्रिब्यूशन/शेयर-अलाइक अभिज्ञापत्रस्य अन्तर्गततया उपलब्धः अस्ति; अन्याः संस्थित्यः अपि सन्ति । अधिकं ज्ञातुम् अत्र उपयोगस्य संस्थितिं पश्यतु ।